



गोटीपुआ नृत्यम्

त्रयोदश अध्यायः

# नृत्येन वैषम्यानाम् अपनयनम्

0680CH13

नृत्ये कदाचित् लिङ्गभेदम् अनादृत्य केनचित् एकेन नर्तकेन/एकया नर्तकिन्या वा सर्वाणि पात्राणि प्रदर्श्यन्ते। नृत्यस्य अनेकेषु पारम्परिकरूपेषु पुरुषाः प्रायः स्त्रीभूमिकां निर्वहन्तः सन्ति इति दृश्यते।

## *भक्ति*-आन्दोलनम्

ख्रीष्टीये षष्ठे शतके सप्तमे शतके वा भक्ति-आन्दोलनम् आरब्धम्। नैकाः प्रादेशिकाः शास्त्रीयाः नृत्यरूपाः अनेन आन्दोलनेन विकसिताः प्रभाविताश्चाभवन्। अद्यतनीयानाम् अस्मदीयानां शास्त्रीयानां नृत्यानां मूलान्यपि अत्रैव विस्तृतानि सन्ति।

भक्ति-काले, नर्तकाः मन्दिरस्य अन्तः पूजानुष्ठानस्य भागाः अभवन्। दक्षिणभारते देवदासिनः तेवदिच्छि-जनाः, ओडिशा-राज्ये महारी-जनाश्च साक्षात् मन्दिरस्य अन्तः देवसेवायां नियोजिताः आसन्।

असमराज्यस्य सत्तारेषु, दक्षिणे भागवतारेषु च चतुष्षष्टिः अनुष्ठानानि पारम्परिकैः नृत्यैः आचर्यन्ते। उत्तरस्य कथाकाराः जनानां नैतिकमूल्यानां वर्धनार्थं भगवतः शिवस्य ताण्डवस्य प्रशंसायाम् कथाः गायन्ति, तस्य अभिनयं च कुर्वन्ति।

भक्ति-आन्दोलनानाम् अवधारणा सामान्यानां जनानाम् कृते सुलभा आसीत्।



*गोटिपुआ इति नृत्यं शिक्षन्तः छात्राः*

© NCERT not to be republished



*अर्धनारेश्वरः*

उदाहरणानि -

***गोटिपुआ नृत्यम्***

गोटिपुआ इति ओडिशाराज्यस्य एका विशिष्टा नृत्यशैली अस्ति। यू-ट्यूब-माध्यमेन तस्य एकां दृश्यमुद्रिकां (भिडिओ) पश्यन्तु।

महारी-जनाः मन्दिरस्य अन्तः भगवतः जगन्नाथस्य सेवायाम् इदं नृत्यं कुर्वन्ति तथा गोटिपुआ अर्थात् बालकाः (न, तु बालिकाः) जनानाम् कृते एतद् नृत्यं प्रदर्शयन्ति।

अत्र, बालकाः एव स्त्रीवेषं धरन्ति, मनोहरमुद्राणां सहयोगेन नृत्यम् उपस्थापयन्ति च।

***अर्धनारीश्वर-नृत्यम्***

अस्मिन् चित्रे नृत्य-प्रसाधनं यद् दृश्यते, तत्र एकः एव शिल्पी भगवान् शिवः भगवती पार्वती इत्युभययोः वेषं धरति इति भवन्तः द्रष्टुं शक्नुवन्ति।

## क्रियाकलापः १ :
## अनन्यानां *लोकनृत्यानां* दृश्यमुद्रिकायां दर्शनम्

लोक-नृत्यस्य विविधरूपाणां दृश्यमुद्रिकाः पश्यन्तु। तत्र बहुविध शारीरिकभङ्गीमानां, मुद्राणां, चलनानां, नृत्यकौशलानां, वेषाणां, गीतानां च प्रयोगः क्रियते।



*महाराष्ट्रप्रदेशस्य लावणी इति लोकनृत्यम्*
*(मुख्यतया स्त्रीभिः अनुष्ठीयते)*



*पश्चिमवङ्गस्य राज्यस्य पुरुलियाप्रदेशस्य छौ नृत्यम्*
*(मूख्यतया पुरुषैः अनुष्ठीयते)*

© NCERT not to be republished

## कर्णाटकराजस्य यक्षगानम्



इदानीं भवन्तः लावणी इति, छौ इति च नृत्ययोः कृते नृत्यकौशलानाम् अभ्यासं कर्तुं शक्नुवन्ति।

अद्यत्वे मोहिनीअट्टं (पूर्वं केवलं महिलाभिः प्रदर्शितमासीत्) तथा यक्षगानं (पूर्वं केवलं पुरुषैः प्रदर्शितमासीत्) इत्येतयोः नृत्ययोः विषये लैङ्गिकप्रतिबन्धान् अपसार्य महत्त्वपूर्णपरिवर्तनस्य सूचना क्रियते।

अस्मिन् विषये एतदपि लक्षणीयं यत् नृत्ये मुद्राणां, चलनानां च संख्याः निर्दिष्टाः न सन्ति। तेषाम् अनेकरूपाणि सन्ति, इतोऽपि असंख्यरूपाणि च भवितुम् अर्हन्ति। नृत्यशिल्पिनः प्रायः विविधशैलीः तत्त्वानि च सम्मिश्र्य पारम्परिक-लैङ्गिक-मानदण्डान् उल्लङ्घ्य स्वकीयां विशिष्टशैलीं कल्पयन्ति।

इदानीं, भवन्तः तस्मिन् स्तरे आगतवन्तः यत्र भवतां प्रदेशस्य विशिष्टायाः नृत्यकलायाः विषये भवन्तः पठितुं शक्नुवन्ति।

### क्रियाकलापः २
### लोकनृत्यस्य पादचालनपद्धतिः

इदानीं वयं पूर्वं शिक्षितानां नृत्यकौशलानाम् अभ्यासं कुर्मः। आवश्यकैः शारीरिकभङ्गैः सह प्रबलचलनानां मृदुचलनानां वा अभ्यासं कुर्मः।

*लावणी, भाङ्गरा* इति नृत्यद्वयस्यापि अभ्यासः बालिकाभिः बालकैश्च क्रियते।

एतेषु नृत्येषु प्रयुक्तानां बाहुसञ्चालनानां हस्तमुद्राणां च विषये अन्विष्यन्तु।

© NCERT not to be republished

## क्रियाकलापः ३
## परियोजनाकार्यम्


जोगती मंजम्मा इत्येषा एकः पथप्रदर्शक-व्यक्तित्वः अस्ति, या लिङ्ग-परिचयस्य अवरोधान् उल्लङ्घ्य कर्णाटकस्य जोगती-नृत्यस्य विकासे स्वकीयं योगदानं दत्तवती। तस्याः विषये अधिकाधिकम् अन्विष्यन्तु तथा तस्याः चित्रैः सह एकं परियोजनाकार्यम् उपस्थापयन्तु।

**परियोजनाकार्यस्य उपस्थापनम्** - तस्याः बाल्यकालस्य काऽपि प्रेरणात्मककथा(यदि अस्ति), शिक्षणानुभवाः, उपलब्धयः, सङ्गठनानि च।

© NCERT not to be republished



*आयताकारः*



*त्रिभुजाकारः*

## नृत्यम्, आकृतयः, *तालाश्च*

गणितं नृत्यं च परस्परं पूरके स्तः।

अस्माभिः नृत्यमाध्यमेन ज्यामितिकाः आकाराः प्रदर्शयितुं शक्यन्ते। नृत्ये ज्यामितिकाः आकाराः, गाणितीयलये चलनानि च अन्तर्भवन्ति। नृत्यनिर्देशनस्य विन्यासार्थं वयं भिन्नानां ज्यामितिकानाम् आकाराणाम् उपयोगं कर्तुं शक्नुमः। लयः तालश्च उभयं गाणिति विन्यासः एवास्ति।

अग्रिमे क्रियाकलापे वयम् अस्य अभ्यासं कुर्मः।

### क्रियाकलापः ४
### नृत्यं ज्यामितिकाः आकृतयश्च

नृत्ये कतिविधाः ज्यामितिकाः आकाराः प्रदर्शयितुं शक्यन्ते?



*नर्तकाः विविधान् आकारान् प्रदर्शयन्तः सन्ति।*

तत्र हस्तबाहुपादानां उपयोगेन त्रिभुजः, वृत्तं, वर्गाकारः, आयताकारः इत्यादिभिन्नभिन्नाकारानि रचयितुं शक्यन्ते।

विषयेऽस्मिन् वर्गे चर्चयन्तु तथा कासाञ्चन ज्यामितिकानां भङ्गीनाम् अभ्यासं कुर्वन्तु।





© NCERT not to be republished



## क्रियाकलापः ५
## विविधाः लयसम्बद्धाः ज्यामितयः

इदानीं पूर्ववर्तिषु क्रियाकलापेषु शिक्षितानि सर्वाणि तत्त्वानि सम्यग् उपयुज्य (बाहवः, हस्तः, पादानि) भिन्नान् ज्यामितिकान् आकारान् रचयितुं प्रयतन्ताम्। अधुना लयोऽपि तत्र योजनीयः।

लयानां भिन्ना भिन्ना स्थितिः तथा क्रमबद्धं रूपमेव तालः इति कथ्यते।

एकैकं समूहं निर्माय भिन्नानां लयानां संयोजनेन विभिन्नान् ज्यामितिकान् आकारान् विन्यासान् वा निर्मातुं प्रयतन्ताम्।

**उदाहरणानि**

२ तालौ + २ तालौ = ४ तालाः
२ तालौ + ३ तालाः = ५ तालाः
२ तालौ + ४ तालाः = ६ तालाः
३ तालाः + ३ तालाः = ६ तालाः
३ तालाः + ४ तालाः = ७ तालाः

एतादृशानां चलनानाम् अभ्यासं कुर्वन्तु तथा तानि चलनानि उक्ताभिः क्रियाभिः सह कथं सम्बद्धानि सन्तीति विषयेऽपि वर्गे चर्चयन्तु।



© NCERT not to be republished